।। श्रीगणेशाय नमः ।। आदिशक्तिरुवाच । कदाचित् सुखमासीनं गणैः सर्वैः समावृतम् । शिवं दृष्ट्वा मयूरेशो मायामाविश्चकार ह ।।१।। समागत्य महेशानं तस्य भालस्थितं प्रभुः । चंद्रं गृह्य गणेशानः प्रययौ क्रीडनोत्सुकः ।।२।। मायया मोहिताः सर्वे शिवमुख्या विशेषतः । न जानंति स्म देवेशं चंद्रतास्कर्यकारिणम्

।।३।। ततः शिवः स्वभाले तं न ददर्श निशाकरम् । क्रोधयुक्तो गणान् प्राह कथं चंद्रो गतो गणाः ।।४।। ततो मुनिसुताः प्रोचुः समागत्य महेश्वरम् । चंद्रं गृह्य मयूरेशः खेलत्यस्माभिरादरात् ।।५।। ततः क्रोधसमाविष्ट उवाच ह शिवो गणान् । बद्ध्वा गणेश्वरं ताड्यानयध्वं मेऽद्य सन्निधौ ।।६।। ततो गणा ययुस्तं ते तेन निःश्वासवायुना । निक्षिप्ताः शंकरस्याग्रे शुष्कपत्रसमप्रभाः ।।७।। एवं क्रमेण सर्वान् स मयूरेशो गणेश्वरान् । भग्नदर्पांश्चकारैव शिवश्चिंतातुरोऽभवत् ।।८।। ततो मायां समाश्रित्य शिवभाले निशाकरम् । मयूरेशः समागत्याऽऽस्थाप्य भ्रांतांश्चकार ह ।।९।। स्वभालस्थं महेशानो दृष्ट्वा चंद्रं गणास्तथा । मेनिरे तं सदा तत्र संस्थितं तं गतागतम् ।।१०।। एवं शिवं पराधीनं कारयामास विघ्नपः । ततः कदाचिद्दैत्येंद्रं वनं हंतुं जगाम ह ।।११।। व्याघ्ररूपधरं दृष्ट्वा शार्दूलोऽभूद्गजाननः । न तं जानंति विप्राणां सुताः शार्दूलरूपिणम् ।।१२।। यत्र तत्र भ्रमंति स्म बालास्तद्दर्शनोत्सुकाः । ते सर्वे सुष्वपुः श्रांता निद्रां लेभुः श्रमान्विताः ।।१३।। पादं दक्षिणदिक्संस्थं दृष्ट्वा तेषां च भानुजः । तान् गृह्य निगडैर्बद्ध्वा चिक्षेपे स्वपुरे यमः ।।१४।। हत्वा दैत्यं मयूरेशः स्वपुरं पुनराययौ । न तत्र मुनिपुत्रान् स ददर्श विस्मतोऽभवत् ।।१५।। गत्वा स्वर्गे यमं जित्वा ययौ तैर्मुनिबालकैः । एवं नानाविधां क्रीडां चकार मयूरध्वजः ।।१६।। दशपंच वयोवर्षाण्यतिक्रम्य गणेश्वरः । शुशुभे खेलसंयुक्तो दैत्यान् हत्वा विशेषतः ।।१७।। अथ तत्राऽऽययौ योगी नारदो गणपं

स्मरन् । उवाच शंकरं सोऽपि हर्षयुक्तेन चेतसा ।।१८।। नारद उवाच । तपसाऽऽराधितौ देव्यौ सिद्धिबुद्धी तु वेधसा । वरदानेन ते पुत्र्यौ बभूवतुः प्रजापते ।।१९।। तदर्थं सदृशं ब्रह्मा नावाप वरमुत्तमम् । मयूरेशाय अधुना दातुमिच्छति स प्रभुः ।।२०।। तथेति तमुवाचाथ शंकरस्तेन संयुतः । मयूरेशं समागृह्य निर्ययौ स गणः स्वयम् ।।२१।। मार्गमध्ये मयूरेशो ददर्श नगरं परम् । सिंधोर्देवविमोक्षार्थं विचारमकरोत् परम् ।।२२।। ततो युद्धं महाघोरं चकार सिंधुना स्वयम् । मयूरेशो गणैः सार्धं सोऽपि तेन महासुरः ।।२३।। ततः परशुना भित्वा नाभिं त्वमृतसंयुताम् । मारयामास सिंधुं च नानादैत्येंद्रनायकैः ।।२४।। विष्णुभक्तः पिता तस्य चक्रपाणिर्महायशाः । मयूरेशार्थमेवं स विचार्य शरणं ययौ ।।२५।। त्यक्त्वा सर्वं गणेशे स लालसो भक्तिसंयुतः । बभूव तं स्वपुर्यां तु समानाय्य पुपूज ह ।।२६।। कारागृहाच्चक्रपाणिर्निष्कास्य विष्णुमुख्यकान् । देवान् देवेंद्रयुक्तांश्चापूजयद्भक्तिसंयुतः ।।२७।। तत्र ब्रह्मा प्रहर्षेण सस्मार तनये स्वके । सिद्धिबुद्धी समायाते रूपलावण्यसंयुते ।।२८।। ते दृष्ट्वा कामसंतप्ता देवेंद्राश्च बभूविरे । देवास्तं प्रार्थयामासुः प्रत्येके विधिमादरात् ।।२९।। अस्मभ्यो देहि देवेश कन्ये परमसुंदरे । न दृष्टे सदृशे कुत्र कामिनीनां गणेषु च ।।३०।। ततो ब्रह्मा जगादैव न सदृशः सुरेश्वराः । आभ्यां तस्मान् मयूरेशाय दास्यामि मदात्मजे ।।३१।। ततोऽतिप्रार्थयामासुर्देवाः सर्वे पितामहम् । जगाद वचनं युक्तं सपुत्र्यौ खेदसंयुतः ।।३२।। सिद्धिबुद्धी सुरेंद्रेषु

वृणुतं वरमीप्सितम् । ते ऊचतुर्विधातारं चित्तस्थं तं वृणीवहे ।।३३।। ततो मात्रां समागृह्य चिंतामणिं प्रदृश्य ते । सिद्धिबुद्धी मयूरेशं त्यक्त्वा देवांश्च जग्मतुः ।।३४।। मालां गले गणेशस्य ततश्चिक्षिपतुर्विधिः । तस्मै समर्पयामास सिद्धिं बुद्धिं विधानतः ।।३५।। ततः सर्वे प्रणेमुस्तं देवेंद्रादय आदरात् । सिंधोर्वधात् प्रहर्षेण युक्ताः संपूज्य तुष्टुवुः ।।३६।। देवर्षय ऊचुः । नमस्ते शिखिवाहाय मयूरध्वजधारिणे । मयूरेश्वरनाम्ने वै गणेशाय नमो नमः ।।३७।। अनाथानां प्रणाथाय गताहंकारिणां पते । मायाप्रचालकायैव विघ्नेशाय नमो नमः ।।३८।। सर्वानंदप्रदात्रे ते सदा स्वानंदवासिने । स्वस्वधर्मरतानां च पालकाय नमो नमः ।।३९।। अनादये परेशाय दैत्यदानवमर्दिने । विधर्मस्थस्वभावानां हर्त्रे विकट ते नमः ।।४०।। शिवपुत्राय सर्वेषां मात्रे पित्रे नमो नमः । पार्वतीनंदनायैव स्कंदाग्रज नमो नमः ।।४१।। नानावताररूपैस्तु विश्वसंस्थाकराय ते । काश्यपाय नमस्तुभ्यं शेषपुत्राय ते नमः ।।४२।। सिंधुहंत्रे च हेरंबाय परशुधराय ते । देवदेवेश पालाय ब्रह्मणां पतये नमः ।।४३।। योगेशाय शुशांतिभ्यः शांतिदात्रे कृपालवे । अनंताननबाहो तेऽनंतोदर नमो नमः ।।४४।। अनंतविभवायैव चित्तवृत्तिप्रचालक । सर्वहृत्स्थाय सर्वेषां पूज्याय ते नमो नमः ।।४५।। सर्वादिपूज्यरूपाय ज्येष्ठराजाय ते नमः । गणानां पतये चैव सिद्धिबुद्धिवराय च ।।४६।। किं स्तुमस्त्वां मयूरेश यत्र वेदादयः प्रभो । योगिनः शांतिमापन्ना अतो नमामहे वयम् ।।४७।। तेन तुष्टो भव

स्वामिन् दयाघन प्रवर्तक । त्वदीयांगसमुद्भूतान् रक्ष नो नित्यदा प्रभो ।।४८।। एवं स्तुत्वा प्रणेमुस्तं ततो देवोऽब्रवीन् स तान् । वरान् वृणुत देवेशा मुनिभिश्च समन्विताः ।।४९।। भवत्कृतमिदं स्तोत्रं सर्वसिद्धिप्रदायकम् । भविष्यति महाभागा मम प्रीतिविवर्धनम् ।।५०।। यः पठेच्छृणुयाद्वापि श्रावयेत्स लभत् पराम् । भुक्तिं मुक्तिं मदीयां तु नरो भक्तिं न संशयः ।।५१।। मयूरेशवचः श्रुत्वा देवाः सर्षिगणाश्च तम् । प्रत्यूचुस्ते प्रणम्येदं वचनं हर्षसंयुताः ।।५२।। देवर्षय ऊचुः । यदि प्रसन्नभावेन वरान् दास्यसि विघ्नप । त्वदीयामचलां भक्तिं देहि नाथ नमोस्तु ते ।।५३।। हतः सिंधुर्महावीर्यस्तेन सर्वे कृतार्थकाः । अधुना स्वाधिकारेषु गमिष्यामस्त्वदाज्ञया ।।५४।। तथेति तानुवाचाथ मयूरेशः प्रतापवान् । दत्त्वा भक्तिं स्वकीयां तु राज्ञे सर्वैर्जगाम ह ।।५५।। चक्रपाणिर्गणेशस्य पंचायतनमार्गतः । अभजत्तं मयूरेशमंते स्वानंदगोऽभवत् ।।५६।। मयूरेशः समायातो मयूरे सर्वसंयुतः । सर्वान् संस्थाप्य देवेशान् जगाद मुनिसत्तमान् ।।५७।। यदर्थमागता देवास्तत् सर्वं सुकृतं मया । अधुना निजलोकेऽहं गमिष्यामि मुनीश्वराः ।।५८।। एवमुक्त्वांतर्दधेऽसौ मयूरेशः स्वलीलया । देवर्षयश्च खेदेन युक्तास्तत्रैव संस्थिताः ।।५९।। पार्वतीशंकरौ तत्र मूर्च्छितौ स बभूवतुः । तयोर्हृदि मयूरेशः प्रकटोऽभूद् जगाद तौ ।।६०।। भवतोर्हृदि संस्थोऽहं चित्तवृत्तिप्रचालकः । न वियोगः कदा मे वां पितरौ नात्र संशयः ।।६१।। बर्हिमूर्तिं समास्थाप्यापूज्य तत्रैव भक्तितः । सेवेथां मां विशेषेण तेन तुष्टौ भविष्यथः ।।६२।।

एवमुक्त्वांऽतर्दधेऽसौ गणेशो गणवल्लभः । ब्रह्मा मूर्तिं द्विजैस्तस्य स्थापयामास हर्षतः ।।६३।। ततो हर्षयुताः सर्वे स्वांशेन स्वस्थलेषु ते । संस्थिताः कार्यसिद्ध्यर्थं स्वस्वकर्मपरायणाः ।।६४।। पूर्णभावेन तत्रैव मयूरेशं सिषेविरे । क्षेत्रवासपराः सर्वे भक्तियुक्ताश्च शक्तयः ।।६५।। विकटस्यावतारोऽयं मयूरेश्वरसंज्ञितः । भक्तानां कथितः सर्वसिद्धिदः प्रीतिवर्धनः ।।६६।। यः पठेत् शृणुयाच्चेद्वा स लभेदीप्सितं फलम् । अंते स्वानंदगो भूत्वा मोदते ब्रह्मतत्परः ।।६७।।

।। ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे षष्ठे खण्डे विकटचरिते मयूरेशचरितवर्णनं नामैकचत्वारिशंत्तमोऽध्यायः ।।

।। श्रीगणेशाय नमः ।। आदिशक्तिरुवाच । विकटेन महादेव्यो रचितं मायया परम् । नानाभेदयुतं ब्रह्माऽसद्रूपं विविधे रतम् ।।१।। तेन नानाविधं ब्रह्म जगन्नानाविधं तथा । सृष्टं तानि विशेषेण जीवहीनानि मेनिरे ।।२।। ततस्तैर्विकटस्यैव तपस्तप्तं सुदारुणम् । एकाक्षरविधानेन दिव्यवर्षसहस्त्रकम् ।।३।। तुष्टस्तानि ययौ देवो वरदानार्थमादरात् । रथस्थः सूर्यरूपेण सर्वात्मा सर्वभावनः ।।४।। तं दृष्ट्वा तानि हर्षेण युक्तानि नेमुरादरात् । तद्दर्शनजबोधेन ज्ञानयुक्तानि शक्तयः ।।५।। आत्माकारोऽयमेकश्च विकटः सूर्यरूपधृक् । न कुत्रचित् प्रदृश्येत भेदो विकटसूर्ययोः ।।६।। तान्याऽऽपूज्य प्रणेमुस्तं पुनस्तोतुं प्रचक्रमुः । स्तोत्रं नानाविधान्येव ब्रह्माणि विश्वपालकैः

सं. मु. पु. खंड. ६ अ. ४१-४२

।।७।। नानाब्रह्माण्यूचुः । विकटाय परेशाय सर्वजीवनधारिणे । आत्माकाराय सूर्याय भानवे ते नमो नमः ।।८।। सप्ताश्वरथसंस्थाय विघ्नेशाय परात्मने । हेरंबाय जगन्नाथ ब्रह्मनाथाय ते नमः ।।९।। संज्ञापते नमस्तुभ्यं साक्षिरूपाय साक्षिणे । छायानाथाय देवेश देवदेवेश ते नमः ।।१०।। अनामयाय नित्याय सहस्त्रकरधारिणे । अनंतभेदहीनायाऽद्वितीयाय नमो नमः ।।११।। सर्वादये सदा सर्वाधाराय विश्वमूर्तये । कर्माधाराय सर्वेषां पालकाय नमो नमः ।।१२।। आदित्याय परेशाय परात्परतराय ते । दिनस्य पतये नाथ दिनपालाय वै नमः ।।१३।। अर्यम्णे काश्यपायैव तेजसां पतये नमः । अनाधाराय वृष्ट्यास्तु चालकाय नमो नमः ।।१४।। किं स्तुमस्त्वां रवे यत्र वेदाः संकुंठिता बभुः । योगिनं सततं सर्व आत्माकारं परात्परम् ।।१५।। एकमेवाद्वितीयं त्वां वदंति वेदवादिनः । वयं भिन्नानि तेन त्वं विकटोऽसि न संशयः ।।१६।। एवं स्तुत्वा तं ब्रह्माणि प्रणेमुर्हर्षभावतः । तान्युत्ताप्यार्यमा वाक्यं जगाद भक्तवत्सलः ।।१७।। सूर्य उवाच । वरान् ब्रूत च ब्रह्माणि दास्यामि भक्तियंत्रितः । भवत्कृतमिदं स्तोत्रं भुक्तिमुक्तिप्रदं भवेत् ।।१८।। यं यमिच्छति तं तं तु दास्यामि स्तोत्रपाठतः । ब्रह्मभूयप्रदं मेऽस्तु स्तोत्रं मद्भक्तिवर्धनम् ।।१९।। सूर्यस्य वचनं श्रुत्वा हर्षेण संयुतानि तु । जगुस्तं ब्रह्ममुख्यानि भक्तियुक्तानि शक्तयः ।।२०।। ब्रह्माण्यूचुः । तुष्टश्चेद्ब्रह्मब्रह्मेश जीवयुक्तानि नित्यदा । कुरुष्व सर्वभावेन स्वस्य सौख्यपराणि तु ।।२१।। भक्तिं देहि सदा नाथ तव पादांबुजे पराम् ।

मायामोहविनाशार्थं योगं देहि परात्परम् ।।२२।। तथेति सविता तेभ्य उक्त्वा ज्ञानं जगाद ह । मायामोहविनाशार्थं गाणेशं योगशांतिदम् ।।२३।। सूर्य उवाच । असत् सत् समनेतीनां संयोगे योग उच्यते । स्वसंवेद्यात्मकश्चैव गकाराक्षरवाचकः ।।२४।। स्वस्वरूपेण हीनोऽयमयोगो योग उच्यते । णकाराक्षरगः सोऽपि वेदेषु कथितोऽभवत् ।।२५।। तयोर्योगे गणेशानः शांतीनां शांतिदायकः । चित्ते चिंतामणिं दृष्ट्वा भविष्यथ सुयोगिनः ।।२६।। संयोगायोगरूपं यन्मायामयं विशेषतः । तस्या विकट-भावेन भजध्वं विकटं सदा ।।२७।। स्वस्वब्रह्माणि संस्थं तु कर्म कृत्वा स्वभावजम् । गणेशार्पणभावेन भवद्भिः स्थीयतां सदा ।।२८।। एवमुक्त्वा स्वयं भानुर्ब्रह्माणि सर्वनायकः । अंतर्दधे महादेव्यः स्वानंदस्थो बभूव ह ।।२९।। ततो सन्मुख्यब्रह्माणि स्वस्वविश्वयुतानि च । जीवयुक्तानि जातानि खेलां चक्रुः परस्परम् ।।३०।। यथा सूर्येण संदिष्टो योगो विकटसंज्ञितः । साधयित्वा तथा तानि सुशांतानि बभूविरे ।।३१।। हृदि चिंतामणिं ज्ञात्वा बहिः कर्माणि कृत्स्नशः । समर्प्य विकटं देव्यो भजन् ब्रह्माणि रेमिरे ।।३२।। एवं विकटमाहात्म्यं सूर्यावतारसंज्ञितम् । कथितं विस्तरेणैव समासेनापि निश्चितम् ।।३३।। अयं सूर्यात्मकश्चैव विकटस्य महात्मनः । अवतारः समाख्यातः सर्वसिद्धिप्रदायकः ।।३४।। शृणुयाद्यः पठेद्वापि सिद्धिं परमां लभेत् । ईप्सितं सर्वमेवं तु परत्रेह लभेत् सुखम् ।।३५।।

।। ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे षष्ठे खण्डे विकटचरिते सूर्यावतारचरितं नाम द्विचत्वारिंशत्तमोऽध्यायः ।।

।। श्रीगणेशाय नमः ।। आदिशक्तिरुवाच । कश्यपस्य च भार्याऽऽसीद्विनता रूपशालिनी । तस्यामंडे समुत्पन्ने द्वेऽतीव तेजसा युते ।।१।। ताभ्यां ज्येष्ठोऽरुणो जज्ञे गरुडोऽनुज एव च । अरुणः सूर्यमाराध्य वरं प्राप हितावहम् ।।२।। सारथिः स रवेरासीन्नित्यं तद्भक्तिसंयुतः । सेवयाऽनन्यभावेन सूर्य आत्मानमच्युतम् ।।३।। गणेशं नित्यमानंदात् सूर्यो भेजे विशेषतः । प्रणम्य सोऽपि पप्रच्छारुणस्तं खेदसंयुतः ।।४।। अरुण उवाच । स्वामिंस्त्वं सर्वभावानामात्माऽमृतमयः सदा । एक एवाद्वितीयोऽसि भजसे कं गजाननम् ।।५।। कोऽसौ गणेश्वरः पूर्णो मिथ्यात्मा कश्यपात्मज । मोहं करोषि देवेश स्वरूपच्छादनाय ते ।।६।। योगिनो देवमुख्याश्च त्वां ज्ञात्वा शांतिमादधुः । त्वत्तः परतरं नास्ति किमर्थं भजसे परम् ।।७।। सूर्य उवाच । त्वयाऽनूरो सत्यमुक्तं वेत्सि मां त्वं विशेषतः । न त्वत्समो मदीये तु योगे कोऽपि विशेषतः ।।८।। पूर्णभावमविज्ञाय शांतिंधृत्वा त्वमंजसा । संस्थितः किमहं ब्रूयामज्ञानं त्वां महायशः ।।९।। गणेशादहमुत्पन्नस्तस्यान्ये शंकरादयः । ज्येष्ठराजश्च तेनायं तस्य ज्येष्ठो न विद्यते ।।१०।। असन्नानाविधा शक्तिस्तत्राहं चात्मवाचकः । तयोः समानभावे त्वाऽऽनंदो विष्णुः प्रकीर्तितः ।।११।। आनंदाच्च परो व्यक्तः शंकरस्तुर्यसंज्ञितः । तेषां योगे गणेशानः स्वानंदाख्यः प्रकीर्तितः ।।१२।। सर्वसंयोगकर्तृत्वात् मायायुक्तो गणेश्वरः । स्वसंवेद्येन योगेन लभ्यतेऽरुण निश्चितम् ।।१३।। तस्मात्परो ह्ययोगश्च स्वसंवेद्यविवर्जितः । तयोर्योगे गणेशानो वेदे

पश्य विचक्षण ।।१४।। ब्रह्मणस्पतिवाच्योऽसौ वयं ब्रह्ममयाः किल । अस्माकं गणराजस्तु स्वामी तस्माद्भजामहे ।।१५।। एवं तस्य वचः श्रुत्वाऽनूरुस्तं प्रणनाम ह । जगाद भक्तिसंयुक्तः सूर्यं तेजस्विनां पतिम् ।।१६।। अरुण उवाच । गणेशप्राप्तये नाथ वदोपायं सुसौख्यदम् । भवामि गाणपत्यश्च येनाऽहं देवनायकः ।।१७।। सूर्य उवाच । एकाक्षरविधानेन तं भजस्व तु काश्यप । हृदि चिंतामणिं दृष्ट्वा योगिवंद्यो भविष्यसि ।।१८।। एवमुक्त्वा ददौ तस्मै मंत्रं गणपतेः प्रभुः । स विधिं तं प्रणम्याऽसौ जगाम वनमुत्तमम् ।।१९।। ततापं तप उग्रं स गणेशध्यानत्यक्त्वा रसयुक्तं जपे रतः ।।२१।। एवं वर्षशतेष्वेनं गतेषु द्विरदाननः । आययौ वरदानार्थं भक्तिसंभावितः प्रभुः ।।२२।। ततः सोऽपि गणेशानं न बुबोध महायशाः । हृदिध्यानेऽस्य संलीनस्तत्र चित्रं बभूव ह ।।२३।। संज्ञायुक्तं गणेशानं रथस्थं स ददर्श ह । पुनः सिद्ध्या च बुद्ध्या च युक्तं दृष्ट्वा सुविस्मितः ।।२४।। हृदि ध्यानं परित्यज्य नेत्रे उन्मील्य चारुणः । अपश्यत्तं बहिः सोऽपि गणेशं वरदायकम् ।।२५।। ततोऽतिहर्षसंयुक्तः समुत्थाय ननाम तम् । पुपूज विधिसंयुक्तस्तुष्टावानम्य हर्षतः ।।२६।। यावत् स्तोतुं समारेभे तावत्तं रथसंस्थितम् । रविं संज्ञायुतं दृष्ट्वा विस्मयं परमं ययौ ।।२७।। गणेशकृपया तेन ज्ञातं सर्वं सुबुद्धिना । गणेशोऽयं रविः प्रोक्तो विकटत्वान्न संशयः ।।२८।। नानाभेदमयी माया तत्रात्मा भेदवर्जितः । अतो विकटसंज्ञोऽयमात्माकारो गजाननः ।।२९।। विकटरूपिणं सूर्यं भजिष्यामि निरंतरम् । कलांशं

गणराजस्य तेन तुष्टोऽयमंजसा ।।३०।। एतदर्थं गणेशेन रूपं सूर्यात्मकं परम् । स्वकीयाभेदभावाख्यं दर्शितं मेऽत्र सांप्रतम् ।।३१।। ततोऽतिभक्तिसंयुक्तः साश्रुनेत्रो बभूव ह । नियम्यात्मानमानंदयुक्तस्तोत्रं प्रचक्रमे ।।३२।। अरुण उवाच । नमस्ते गणनाथाय तेजसां पतये नमः । अनामयाय देवेश आत्मने ते नमो नमः ।।३३।। ब्रह्मणां पतये तुभ्यं जीवानां पतये नमः । आखुवाहनगायैव सप्ताश्वाय नमो नमः ।।३४।। स्वानंदवासिने तुभ्यं सौरलोकनिवासिने । चतुर्भुजधरायैव सहस्त्रकिरणाय च ।।३५।। सिद्धिबुद्धिपते तुभ्यं संज्ञानाथाय ते नमः । विघ्नहंत्रे तमोहंत्रे हेरंबाय नमो नमः ।।३६।। अनंतविभवायैव नामरूपप्रधारिणे । मायाचालक सर्वेश सर्वपूज्याय ते नमः ।।३७।। ग्रहराजाय दीप्तीनां दीप्तिदाय यशस्विने । गणेशाय परेशाय विघ्नेशाय नमो नमः ।।३८।। विवस्वते भानवे ते रवये ज्योतिषां पते । लंबोदरैकदंताय महोत्कटाय ते नमः ।।३९।। यः सूर्यो विकटः सोऽपि न भेदो दृश्यते कदा । भक्तिं देहि गजास्य त्वं त्वदीयां मे नमो नमः ।।४०।। किं स्तौमि त्वां गणाधीश योगाकारस्वरूपिणम् । चतुर्धा भज्य स्वात्मानं खेलसि त्वं न संशयः ।।४१।। एवं स्वस्य स्तुतिं श्रुत्वा विकटो रूपमादधे । वामांगे संज्ञया युक्तं गजवक्त्रादिचिह्नितम् ।।४२।। तं दृष्ट्वा प्रणनामाथानूरुर्हर्षसमन्वितः । तं जगाद गणाधीशो वरं वृणु हृदीप्सितम् ।।४३।। त्वया कृतमिदं स्तोत्रं सर्वसिद्धिप्रदायकम् । भविष्यति न संदेहश्चिंतितं स लभेत् परम् ।।४४।। शृणुयाद्वा जपेद्वाऽपि

तस्य किंचिन्न दुर्लभम् । भविष्यति महापक्षिन् मम संतोषकारकम् ।।४५।। गणेशवचनं श्रुत्वाऽनूरुस्तं प्रणिपत्य च । जगाद साश्रुनेत्रः सन् सरोमांचो गजाननम् ।।४६।। अनूरुरुवाच । भक्तिं देहि गणाधीश तव पादांबुजाश्रिताम् । गाणपत्यप्रियत्वं मे सदा संगं महात्मनाम् ।।४७।। तथेति तमथोक्त्वाऽसौ विकटोंऽतर्दधे स्वयम् । अनूरुः खेदसंयुक्तोऽभवत्तत्रैव संस्थितः ।।४८।। ततः संस्थापयामास मूर्तिं गणपतेर्द्विजैः । भानुविनायक इति नाम चक्रे सुहर्षितः ।।४९।। पूजयित्वा गणेशानं सूर्यं समागतोऽभवत् । अरुणस्तं प्रणम्यैव वृत्तांतं कथयत् परम् ।।५०।। तेनैवं स्थापितं तत्रारुणो गणपतिं परम् । अभजद्रथसंस्थश्च योगशांतिपरोऽभवत् ।।५१।। एवं विकटमाहात्म्यं भानुविघ्नेशगं परम् । तदीयांशावतारस्थं कथितं सर्वसिद्धिदम् ।।५२।। शृणुयाद्यः पठेद्वापि श्रावयेद्वा नरः किल । स ईप्सितफलं प्राप्यांते स्वानंदमवाप्नुयात् ।।५३।।

।। ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे षष्ठे खंडे विकटचरिते भानुविनायकचरितं नाम त्रिचत्वारिंशत्तमोऽध्यायः ।।

।। श्रीगणेशाय नमः ।। आदिशक्तिरुवाच । एकमेवाद्वितीयं यद्ब्रह्म वेदेषु शक्तयः । तदेव विकटः प्रोक्तस्तेन माया प्रकाशिता ।।१।। मायायां बिंबितं ब्रह्म विकटस्य महात्मनः । आत्माकारं च सर्वत्र भ्रमस्थं जीववाचकम् ।।२।। संज्ञा जाता ततस्तस्य विकटस्य परात्मनः । सा संज्ञाऽभूद्रवेर्भार्या माया खेलकरी परा ।।३।। तस्यां बिंबमयाद्वीर्यान्नाना जीवा बभूविरे ।

सं. मु. पु. खंड. ६ अ. ४३-४४

तेषां सूतिकरः सोऽपि सूर्य इत्यभिधीयते ।।४।। संज्ञया संयुतः सूर्यो ज्ञानहीनो बभूव ह । तपस्ततap घोरं स गणेशस्य महात्मनः ।।५।। दिव्यवर्षसहस्त्रेणैकाक्षरेण सुतोषितः । प्रसन्नस्तं ययौ सोऽपि भक्तवात्सल्यकारणात् ।।६।। उवाच तं रविं देवो वरं ब्रूहि हृदीप्सितम् । दास्यामि तपसा तुष्टो भवेद्यदपि दुर्लभम् ।।७।। ततो भानुर्गणेशानं दृष्ट्वा हर्षसमन्वितः । संज्ञया सहसोत्थाय प्रणनाम गजाननम् ।।८।। पुनः पुनर्ननामाथ तं संपूज्य महायशाः । कृत्वा करपुटं संज्ञायुतः स्तोतुं प्रचक्रमे ।।९।। सूर्य उवाच । नमस्ते विकटायैव मायामायिकरूपिणे । वामांगे संज्ञया युक्त दक्षिणांगे च भानवे ।।१०।। तयोर्योगे गणाधीश सिद्धिबुद्धिपतिर्मतः । गजाननादिचिह्नैश्च संयुतस्ते नमो नमः ।।११।। एकमेवाद्वितीयं यद्ब्रह्म तद्वर्णये कथम् । धन्योऽहं सर्वभावेन देवं दृष्ट्वा गजाननम् ।।१२।। गजाननाय सर्वादिपूज्याय परमात्मने । हेरंबाय सदा ज्येष्ठराजाय ते नमो नमः ।।१३।। परेशाय महाविघ्ननाशनाय महात्मने । दुरात्मभ्यो महाविघ्नदायकाय नमो नमः ।।१४।। अनाथाय सनाथानां नाथाय सर्वदायिने । अनाथानां प्रणाथाय नाथनाथाय ते नमः ।।१५।। अनंतविभवायैवानंतमायाप्रधारिणे । ब्रह्मणस्पतये तुभ्यं कवये ते नमो नमः ।।१६।। मूषकवाहनायैव सर्वांतरप्रचारिणे । मूषकध्वजिने तुभ्यं मयूरेश नमोस्तु ते ।।१७।। किं स्तौमि त्वां गणाधीश पंचचित्तप्रचालक । अतोऽहं प्रणमाम्येव तेन तुष्टो भव प्रभो ।।१८।। एवं संस्तुवतस्तस्य भक्त्या रोमोद्गमोऽभवत् । रुद्धकंठं प्रनृत्यंतं

गणेशस्तं जगाद ह ।।१९।। श्रीगणेश उवाच । मदीयस्तवनं चेदं सर्वदं संभविष्यति । त्वया कृतं पठेद्यश्च शृणुयात्तस्य सर्वदा ।।२०।। यं यमिच्छति तं तं तु दास्यामि स्तोत्रपाठतः । संतुष्टोंऽते ब्रह्ममयं करिष्यामि महामते ।।२१।। दास्यामि त्वं वरान् ब्रूहि ह्यधुना भक्तिमोहितः । सस्त्रीकस्मान् महाभानो मम भक्ततरो मतः ।।२२।। भानुरुवाच । प्रसन्नोऽसि यदा ढुंढे देहि भक्तिं त्वदीयिकाम् । ज्ञानं स्वाभाविकं देहि नानाकार्यकरं प्रभो ।।२३।। परं सामर्थ्यमतुलं देहि सर्वात्मधारकम् । मां कुरुष्व गणेशान गाणपत्यप्रियं सदा ।।२४।। त्वं मे पुत्रो भव स्वामिन् संसारे तारणात्मकः । तत्र त्वां पुत्रभावेन भजिष्यामि निरंतरम् ।।२५।। हृदये चित्तसंस्थं त्वां मूर्तौ देवस्वरूपिणम् । तेनाहं कृतकृत्यश्च भविष्यामि गजानन ।।२६।। ओमित्युक्त्वा गणाधीशस्ततोंऽतर्धानगोऽभवत् । सूर्यस्तं चिंत्य स्वस्थानं जगाम प्रियया सह ।।२७।। सूर्यः सत्तासमायुक्तो ज्ञानवान्निर्ममे परम् । असद्ब्रह्म ततः सर्वं नानारूपम् कल्पयत् ।।२८।। गणेशवरदानेन मोहहीनो बभूव ह । अभजत्तं सदा भानुर्भक्त्या योगींद्रवंदितः ।।२९।। एकदा प्रियया युक्तः सस्मार गणनायकम् । तामिस्त्रासुरगर्वेण पीडितो बलवत्तरम् ।।३०।। स्मृत्या समागतं तत्र गणेशं पुत्ररूपिणम् । बालं शुंडाधरं वीक्ष्य तं पप्रच्छ विभावसुः ।।३१।। सूर्य उवाच । कोऽसि त्वं वद मां बाल गणेशाकृतिधारक । किमर्थमिह चायातः किं गणेशो भवान् परः ।।३२।। सूर्यस्य वचनं श्रुत्वा तं जगाद गजाननः । स्मृतिजोऽहं सुतो भानो तव विघ्नेश्वरः स्वयम्

।।३३।। पुरा दत्तो वरस्तेन पुत्रोऽहं ते समागतः । पालयस्व पितर्मां त्वं संज्ञया सह मानद ।।३४।। तस्य तद्वचनं श्रुत्वा संज्ञया सह चार्यमा । प्रणम्यापूज्य तुष्टाव अथर्वशिरसा प्रभुम् ।।३५।। एतस्मिन्नंतरे तत्राऽऽजगाम सुरसत्तमः । तामिस्त्रस्तं विलोक्यैव पपाल सविता भयात् ।।३६।। उत्थाय गणनाथस्तं जघान मुष्टिघाततः । पातयामास भूम्यां स निर्जीवं दैत्यपुंगवम् ।।३७।। मृतं दैत्यं विलोक्यैवाऽऽजगाम सविता पुनः । तं प्रणम्य स्थितो दूरे गणेशेन विमोहितः ।।३८।। मोहितः संज्ञया सार्धं भानुस्तं गृह्य पुत्रकम् । लालयामास हर्षेण पुत्रभावपरायणः ।।३९।। गणेशमायया तत्र संज्ञा स्तन्यमपाययत् । वरं दत्वा गतं पुत्रं वरदाख्यं चकार तम् ।।४०।। ततः सोंऽतर्हित पुत्रो भानुः संमूर्च्छितोऽभवत् । संज्ञया च तयोर्ढुंढिर्हृदि संस्थो बभूव ह ।।४१।। मा शोकं कुरुतं तातौ न वियोगश्च मे क्वचित् । मूर्तिं कृत्वा सदा तत्र पूजयेथां निरंतरम् ।।४२।। ततस्तौ सावधानौ तु तथा चक्रतुरादरात् । भक्त्या गणपतिं नित्यं भजतः परमेश्वरौ ।।४३।। शक्तय ऊचुः । कौऽसौ तामिस्त्रसंज्ञश्चासुरस्तस्य चरित्रकम् । वद शक्ते यदर्थं तु वरदः संबभूव ह ।।४४।। आदिशक्तिरुवाच । सूर्योऽहंकारसंयुक्तो बभूवे जीवनात्मकः । सर्वेषां दीप्तिदाताऽहं मम दीप्तिकरो न च ।।४५।। एवं बहौ गते काले विस्मृतो गणनायकम् । छायायां तस्य जज्ञेऽयं तामिस्त्रः पुरुषाकृतिः ।।४६।। तं दृष्ट्वा हर्षितो भानुः पुत्रं मेने हितावहम् । अंधकारकरं पूर्णं वरदस्तमुवाच ह ।।४७।। भानुरुवाच । त्रिगुणान्नभयं पुत्र

भविष्यति कदाचन । त्रैलोक्यराज्यमुग्रं ते मया दत्तं विशेषतः ।।४८।। यद्यदिच्छसि तत्तत्ते सफलं सर्वदा किल । भविष्यति च तामिस्त्र नाम भव सुभाग्यवान् ।।४९।। तं प्रणम्य महादैत्यः पातालमगमन्मुदा । शुक्रेण प्रेरितैर्दैत्यैः कृतो राजा सुरद्विषाम् ।।५०।। सह तैर्मदसंयुक्तो जिग्ये ब्रह्मांडमंडलम् । राज्यं चकार दैत्येशैर्महाबलयुतो बभौ ।।५१।। रविं तेजस्विनं दृष्ट्वा वैरभावेन संयुतः । अंधकारेण नित्यं संछादयामास शक्तयः ।।५२।। निरर्थकं चकारासौ सूर्यं तेजस्विनां वरम् । नानायत्नपरः सूर्यस्तं जेतुं न शशाक ह ।।५३।। ततोऽहंकारहीनः स सस्मार गणनायकम् । गणेशेन हतो दैत्यः सूर्यभावप्ररक्षणात् ।।५४।। एतत् सर्वं समाख्यातं सूर्यपुत्रस्य चेष्टितम् । वरदस्य महादेव्यः सर्वसिद्धिकरं परम् ।।५५। श्रृणुयादिदमाख्यानं पठेद्वा तस्य सर्वदम् । भविष्यति सदा चांते ब्रह्मभूयप्रदायकम् ।।५६।।

।। ओमिति श्रीमदांत्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे षष्ठे खंडे विकटवरदचरितं नाम चतुश्चत्वारिंशत्तमोऽध्यायः ।।

।। श्रीगणेशाय नमः ।। आदिशक्तिरुवाच । एवं नानावताराश्च धृतास्तेन महात्मना । विकटेन महादेव्यः संख्यातुं नैव शक्यते ।।१।। भक्तिप्रियस्वभावेन भक्तानां विघ्ननाशनात् । कुरुते स्वावतारान् स विकटः परमेश्वरः ।।२।। मयूरक्षेत्रमधुना गच्छध्वं तत्र चाप्यहम् । संस्थिता पूर्णरूपेणात्र कलांशात्मिका मुदा ।।३।। तत्र विघ्नेश्वरं भक्त्या सेवध्वं शक्तयः पराः । तेन

सं. मु. पु. खंड. ६ अ. ४४-४५

योगींद्रवंद्याश्च भविष्यथ न संशयः ।।४।। विषयादिषु भावेषु मा चित्तं कुरुत प्रियाः । गाणेशमार्गमाश्रित्य भजध्वं विकटं परम् ।।५।। वेदादिषु गणेशस्य प्रीतिदं कर्म चोत्तमम् । तदेव भक्तिसंयुक्ताः कुरुध्वं नित्यमादरात् ।।६।। गणेशमूर्तेश्च हृदि चिंतनं कुरुत प्रियाः । मानसीं बाह्यपूजां च गणेशप्रीणनाय ताम् ।।७।। विषयेषु विरक्तत्वाद्विकटा भक्तिरुत्तमा । गणेशे सक्तचित्ता सा कर्तव्या नित्यमादरात् ।।८।। मुद्गल उवाच । एवमुक्त्वा ददौ ताभ्यो मंत्रमेकाक्षरं परम् । सविधिं गणराजस्य ततो मौनं समादधे ।।९।। प्रणम्य शक्तयः सर्वास्ततस्तां भक्तिसंयुताः । महाकालीमुखा दक्ष ययुः क्षेत्रं मयूरकम् ।।१०।। मयूरके तत्र देवीं ददृशुस्ताः सुहर्षिताः । प्रणम्यापूज्य तां ढुंढिं ततस्तेपुस्तपो महत् ।।११।। शतवर्षे गते तासां पुरतो मयूरेश्वरः । समाययौ ततस्तां ताः प्रणेमुर्हर्षसंयुताः ।।१२।। पूज्य नानाविधैर्देवमुपचारैर्मनोरमैः । पुनः प्रणम्य विघ्नेशं तुष्टुवुः करसंपुटाः ।।१३।। महाकालीमहालक्ष्मीमहासरस्वतय ऊचुः । मयूरेशाय विघ्नेशाय भक्तविघ्नहारिणे । विघ्नदात्रे ह्यभक्तेभ्यो गणेशाय नमो नमः ।।१४।। लंबोदराय देवाय मूषकध्वजिने नमः । अनाथानां सनाथाय नमो नाथाय ते नमः ।।१५।। परेशाय महेशेभ्यः सिद्धिदाय गजानन । अनंताय सदा स्वेभ्यः सर्वदाय नमो नमः ।।१६।। ब्रह्मणां पतये तुभ्यं सदा शांतिमयाय च । शांतीनां शांतिरूपाय परात्मने नमो नमः ।।१७।। हेरंबाय नमस्तुभ्यं कवये कविरूपिणे । कविभ्यः पददात्रे च कवीशाय नमो नमः ।।१८।। सिद्धिबुद्धि-

वरायैव सिद्धिबुद्धिप्रदायिने । सिद्धिबुद्धिप्रचालाय तद्रूपाय नमो नमः ।।१९।। मायामायिकचिह्नाद्यैः प्रखेलकस्वरूपिणे । योगशांतिस्थभावाय शांतिदाय नमो नमः ।।२०।। शक्तये भानवे तुभ्यं विष्णवे शंकरात्मने । नानारूपधरायैव खेलकाय नमो नमः ।।२१।। किं स्तुमस्त्वां गणाधीश यत्र शांतिं प्रलेभिरे । वेदादयः शिवाद्याश्च नमामो मयूरध्वज ।।२२।। भक्तिं ते देहि सर्वेश वासं क्षेत्रे त्वदीयिके । तथेति ता गणाधीशो ह्यगदद्भक्तियंत्रितः ।।२३।। इदं स्तोत्रं पठेद्यस्तु शृणुयात् स लभेत् परम् । इह भुत्वाऽखिलान् भोगानंते स्वानंदमाप्नुयात् ।।२४।। एवं दक्ष महच्चित्रं चरितं कथितं मया । विकटस्य समासेन सर्वसिद्धिप्रदायकम् ।।२५।। नानेन सदृशं किंचित् सर्वदं कुत्र वर्तते । साक्षाद्ब्रह्मप्रदं पूर्णं तत्र किं वर्णयाम्यहम् ।।२६।। इदं विकटमाहात्म्यं शृणुयाद्यो नरोत्तमः । श्रावयेच्च पठेत्सोऽपि सर्वसिद्धिमवाप्नुयात् ।।२७।। एकमावर्तनं नित्यं यः कुर्यात् स मतो परः । साक्षाद्विकटरूपः स दर्शनात् पावनो

नृणाम् ।।२८।। यावंति साधनान्येव साधयेत् परमादृतः । शतवारं लभेत् पुण्यं खंडस्यास्य श्रवाच्च तत् ।।२९।। इष्टापूर्तादिकं यस्तु कुर्याद्भक्तिसमन्वितः । तस्माच्छतगुणं पुण्यं श्रवणादस्य संलभेत् ।।३०।। पुराणोपपुराणानि सेतिहासानि नित्यशः । शृणुयाच्च ततः पुण्यमनेन स्याच्छताधिकम् ।।३१।। बहुनात्र किमुक्तेन यत्र ब्रह्मपतिः परः । वर्णितो विकटस्तेन समं किं संभवेद्वद ।।३२।। सूत उवाच । एवमुक्त्वा महायोगी मुद्गलो विरराम ह । दक्षो हर्षयुतोऽत्यंतं प्रणनाम च मुद्गलम् ।।३३।। मया संपूर्णभावेन कथितं ते द्विजोत्तम । कामनाशकरं पूर्णं विकटस्य चरित्रकम् ।।३४।। धर्मार्थकाममोक्षाणां ब्रह्मभूयस्य दायकम् । नानेन सदृशं किंचित् किं भूयः श्रोतुमिच्छसि ।।३५।।

।। ओमिति श्रीमदान्त्ये पुराणोपनिषदि श्रीमन्मौद्गले महापुराणे षष्ठे खंडे विकटचरिते विकटचरितसमाप्तिवर्णनं नाम पंचचत्वारिंशत्तमोऽध्यायः ।।

।। इति श्रीमुद्गलपुराणे षष्ठः खंडः समाप्तः ।।